नाम् । याहि सर्वात्मभावेन संयास्यस्यकुतोभयः" इत्यादीतिदिक् । अत एव श्रुतिः–"आत्मानं द्वेधाऽपातयत पतिश्च पत्नी चाभवताम्" इति, व्याससूत्रे "लोकवत्तु लीला कैवल्यम्" इति, "सर्वज्ञानस्वरूपं हि ब्रह्म पूर्वं रिरंसया । ततोऽखिलजगद्रूपं भूत्वा तत्रातिदुस्तराः । भक्ताः सर्वं परित्यज्य प्रभुप्राप्त्यै यथा रहः । साक्षात्स्वरूपदानेन परा लीलेयमित्यपि । लीलासंबंधिनस्तत्र सर्वं भगवदात्मकम् । प्रवर्तकत्वतो वेणुनादो वेदात्मकोऽत्र हि" । "यतो वाचो निवर्तंते अप्राप्य मनसा सह" । इति, श्रुतिः "आनंदं ब्रह्मणो विद्वान् न बिभेति । कुतश्चन" इति चेति दिक् ।

इति श्रीमद्वल्लभाचार्यविरचितं गायत्रीभाष्यं संपूर्णम् ।

## अथ गायत्रीव्याख्या ।

श्रीकृष्णः शरणं मम ।

श्रीकृष्णः स्वात्मनः सर्वमुत्पाद्य विविधं जगत् ।
तदासक्तांशबोधाय शब्दब्रह्माभवत्स्वयम् ॥ १ ॥
तत्र सर्गादिभिः क्रीडन्निन्यानंदरसात्मकः ।
निजभावप्रकाशाय गायत्रीरूप उद्बभौ ॥ २ ॥

सा षड्गुणयुतं सर्वदेवबीजं गुणातिगम् ।
सर्वावताररूपं हि सर्वतत्त्वोपबृंहितम् ॥ ३ ॥
शृंगारैश्वर्यसंयुक्तं पुरुषद्वयपूरणम् ।
भक्त्या सर्वेंद्रियाह्लादि चतुर्विंशाक्षरं ततः ॥ ४ ॥
मार्गत्रयप्रकटनं भावत्रयविवर्धनम् ।
सच्चिदानंदपूर्णं च त्रिपदेति प्रकीर्त्यते ॥ ५ ॥
छंदो मंत्रस्य गायत्री प्रेमोल्लासादहर्निशम् ।
गायंतं त्रायते भावमाच्छादयति चैव हि ॥ ६ ॥
विश्वामित्रो जगन्मित्रमृषिरत्र हरिःस्वयम् ।
मित्रे चर्षावित्ति प्रोक्तेः पूर्वाच्चापि प्रतीयते ॥ ७ ॥
सविता सर्वबीजानां निजानां देवतास्य हि ।
आचार्यो भगवानग्निर्मुखमस्य प्रकीर्तितम् ॥ ८ ॥
गतिज्ञानार्थधातूक्त्या न लोपाच्च प्रतीयते ।
लोपस्यादर्शनात्मत्वात्प्राकृतानुकृतिर्मया ॥ ९ ॥
ब्रह्मा शिरो जगद्बीजं सत्यलोकस्थितेरपि ।
यज्ञात्मकोजगद्व्यापी शृंगाररसविग्रहः ॥१०॥
विष्णुर्हृदयमित्युक्तं हृद्यं हृदयं श्रुतौ ।
तत्तद्धर्मप्रधानत्वात्सर्वं च स्वयमेव हि ॥११॥
रुद्रःशिखेति कथनात्क्लेशात्मा स निरूपितः ।
अहंकारो बंधरूप इति बद्धा शिखा मता ॥१२॥

मुखस्याग्नित्वकथनात्तज्ज्वाला च शिखा मता ।
लौकिकी दुष्टदाहाय घोरातनुरिति श्रुतेः ॥१३॥
पृथिवी भगवत्कीर्तिरुत्पत्तेः कारणं मतम् ।
भक्तिबोधाय चरणरेणुरूपत्वकीर्तनम् ॥१४॥
प्रियत्वाय हरेः सर्वप्राणात्मत्वेन वर्णनम् ।
शुक्लभास्वररूपं तु श्वेतवर्णेतिकीर्तितम् ॥१५॥
भगवद्योग्यतासिद्ध्यै श्वेतः सर्वाधिको मतः ॥
सांख्यानसगोत्रत्वं भगवद् भागसिद्धये ॥ १६ ॥
स हि ब्रह्म परं जीवः सच्चिदानंदतोभयोः ॥
सगोत्रत्वमतः प्रोक्तं नैव लक्षण्यमण्वपि ॥ १७ ॥
भगादेशादयो वापि शक्त्यश्चेंद्रियाणि च ॥
ज्ञानानि खंडाखंडानि कुक्षौ सर्वविनिश्चयात् ॥१८॥
धामान्यर्थ विभावाश्च सर्वोपनिषदः शिरः ॥
समीपनयने विष्णोर्विनियोगः प्रकीर्तितः । १९ ॥
सप्त व्याहृतयः प्रोक्ता भूरैश्वर्यमुदाहृतम् ॥
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम् ॥ २० ॥
अंतरिक्षत्वकथनाद्भुवो वीर्यं निरूपितम् ॥
सुवः श्रीः श्रीर्मनुष्यस्य कथनादवसीयते ॥ २१ ॥
महो यशः परं प्रोक्तं मुखं तेजस्ततोऽत्र हि ॥
जनो वैराग्यमित्युक्तं तापनाशकता यतः ॥ २२ ॥

जनताया तु तन्मुख्यमतोजन इतीरितम् ॥
यस्य ज्ञानमयं प्रोक्तं तपस्तस्मात्तदेव हि ॥ २३ ॥
सत्यं परमिति प्रोक्तं स्वरूपमिति निश्चितम् ॥
लोकवेदप्रसिद्धार्थकथनाय तदीयताम् ॥ २४ ॥
द्वादशात्मत्वकथनात्सविता पुरुषोत्तमः ॥
रूपमासक्तिजनकं वरणीयमितीरितम् ॥ २५ ॥
वरणे स्वार्थपरतानिवृत्त्यै वृणुते यतः ॥
अन्योन्यरसबोधाय तथा वा समुदीरितम् ॥ २६ ॥
भयकामाद्यभावाय भोग्यत्वाय च भर्जनम् ॥
दशलीलावबोधाय देवत्वं दुर्लभत्वतः ॥ २७ ॥
दशावस्थावबोधाय प्रीतिध्यानं च कीर्तितम् ॥
स्वस्यायोग्यत्वतो बुद्धिप्रेरणं ध्रुववन्मतम् ॥ २८ ॥
निरोधसिद्धये धीषु बहुत्वं परिकीर्तितम् ॥
जीवे बहुत्वकथनं तत्संबंधिषु सिद्धये ॥ २९ ॥
नित्यसंबंधसिद्ध्यर्थं षष्ठी जीवेशयोर्मता ॥
उत्सिक्तभावबोधाय स्वभावत्याजनाय च ॥ ३० ॥
वांछाधिक्यज्ञापनाय प्रकर्षः परिकीर्तितः ॥
आशीरंते पूर्णतायै प्रेरणं सर्वतोऽधिकम् ॥ ३१ ॥
आपः श्रद्धाधर्ममूलं ज्योतिरप्ययस्फुटौ परौ ॥
भावास्त्रयो मंत्रपूर्तौ प्रोक्ताव्याहृतयः स्फुटाः ॥३२॥

दोषाभावाय सर्वस्य ब्रह्मात्मत्वेन कीर्तनम् ।
नवीनभावजनक उभयोरतिवर्धनः ॥३३॥
तस्मात्प्रणव इत्युक्तस्तस्याप्यर्थोऽयमेव हि ॥३४॥
इति श्रीमद्विट्ठलदीक्षितानां हस्ताक्षरैः सुलिखितान्येतानि पद्यानि ॥ "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः" इति श्रुतेः ॥ इत्यपि तत्रैव । श्रीगोपीजनवल्लभाय नमः ॥

इति श्रीमद्विट्ठलेश्वराचार्यकृता गायत्रीव्याख्या समाप्ता ।

# अथ त्रिविधलीलानामावली ।

श्रीकृष्णाय नमः ।

नामावलीं प्रवक्ष्यामि केशवस्यातिवल्लभाम् ।
यस्याः संकीर्तनाद्विष्णुरात्मानं संप्रयच्छति ॥१॥

श्रीकृष्णाय नमः ॥१॥ नराकृतये नमः ॥२॥
परब्रह्मणे नमः ॥३॥ यदुकुलचूडामणये नमः ॥४॥
वसुदेवनंदनाय नमः ॥५॥ भूमिक्लेशहराय नमः ॥६॥
पुण्यश्रवणकीर्तनाय नमः ॥७॥
कलिमलसंहृतिकल्पकयशःपुंजाय नमः ॥८॥